International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 182-184
© 2022 IJSR
www.anantaajournal.com
Received: 04-04-2022
Accepted: 02-06-2022

डा. चुक्का प्रवीणः
रीडर्, संस्कृतविभागाध्यक्षः प्रभुत्व महिला कलाशाला, गर्तपुरी, आन्ध्रप्रदेशः, भारत

Corresponding Author:
डा. चुक्का प्रवीणः
रीडर्, संस्कृतविभागाध्यक्षः प्रभुत्व महिला कलाशाला, गर्तपुरी, आन्ध्रप्रदेशः,

# मृच्छकटिके स्त्रीपात्राणि

## डा. चुक्का प्रवीणः

प्रस्तावना

कालिदासानन्तररूपकेषु शूद्रको कृतं मृच्छकटिकं संस्कृतदृश्यवाङ्मये महान्तं स्थानमधितिष्ठति। अस्य कर्ता आन्ध्रदेशशासकः वासिष्ठीपुत्रपुलोमाविः, शासनकालश्च B. C द्वितीयशतकमिति वाङ्मयचरित्रकाराणां मतम् । रूपकेषु इदं प्रकरणम्। अतः कुलजा वेश्या वा नायिका भवितुमर्हति। किन्तु अस्यां नायिका वसन्तसेना, सत्गृहिणीलक्षणसम्पन्ना वेश्या। प्रायशः वेश्याः धनिष्वेव अनुरक्ताः भवन्ति न गुणवत्सु। किन्तु इयं नष्टविभवे सर्वगुणसम्पन्ने चारुदत्ते अनुरक्ता। अतः स्त्रीणांप्रेम चञ्चलमिति लोकव्यावहारस्य प्रत्युदाहरणरूपा।

> अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः।
> गुणानुरक्ताः गणिका च यस्य वसन्तशोभेव वसन्तसेना।।[1]

विपत्तिकाले गृहिणीपरीक्षा इति लोकव्यवहारः। महत्यामपि आपदि सा सत्यपि गत्यन्तरे प्रियतमं पुरुषं न त्यजति सैव उत्तमा गृहिणी। यद्यपि भार्या भर्तृविषयिकेयं लोकोक्तिः तथापि पतिव्रता गृहिणीव सा सर्वात्मना कृतनिर्बन्धाऽपि स्वमनसि स्थितं चारुदत्तं न विस्मृतवती। समग्रे रूपके एव एष विषयः यद्यपि स्पष्टो भवति तथापि यथावकाशं निरूपयितुं संग्रहेण निरूप्यते। अद्यतनकाले मध्यप्रदेशे उज्जयिनीति या विख्याता शिवनगरी वर्तते सैव अवन्ती। तस्यां चारुदत्तो नाम द्विजः समुद्रवाणिज्येन प्राप्तमहाविभवः अपि अनन्तान् संपदान् अर्थिसात् कृत्वा दरिद्रोऽभूत्। वसन्तसेना तद्गुणश्रवणमात्रेण तस्मिन् अनुरक्ता। राजस्यालकः

---
1

शकारोऽपि तां कामयते। शकारः अनन्तं धनं दातुं प्रभवति अपि च विप्रियकारिणं हन्तुमपि शक्नोति। एवंविधे सन्दर्भे वेश्या स्वप्राणरक्षणार्थं शकारमेव अङ्गीकरोतीति लोकनीतिः वेश्याधर्मश्च। तथापि भयरहिता वसन्तसेना चारुदत्ते प्रेम न तत्याज। शकरः जीर्णोद्याने वसन्तसेनां मारयित्वा मृतेति भ्रान्त्या जीर्णपत्रैः आच्छाद्य निष्क्रान्तः अपि च धनलोभेन चारुदत्तः वसन्तसेनां हत्वा तस्याः भूषणानि अपहृतवानिति व्यवहारम् अधिकरणे आरोपितवान्। चारुदत्तः मृत्युदण्डेन दण्ड्यः इति राज्ञा निरूपितः। भाग्यवशात् कश्चन क्षपणकः वसन्तसेनां ररक्ष। चारुदत्तः दण्डात् लोकापवादात् च मुक्तोऽभूत्। राजाऽपि दुर्व्यवहारात् राज्यभ्रष्टः। नूतनेन राज्ञा वसन्तसेना गृहिणी पदवीं आरोहिता। एवं स्त्रियः धनप्रियाः अपि प्रायशः गुणाभिमानिनः भवन्तीति सर्वोत्तमरूपा शूद्रकेन निरूपिता। प्रथमाङ्के शकारानुचराः तां बहुधा तर्जयन्ति। तेऽपि भीताः एव शकारं सेवन्ते इति तत्रैव स्पष्टम्। शकारास्य आप्ततमः अनुचरः वटोऽपि तस्याः गुणाभिमानित्वं अभिनन्दति यथा –विटः–(स्वगतम् ।) यदेव परिहर्तव्यं तदेवोदाहरति मूर्खः। कथं वसन्तसेना आर्यचारुदत्तमनुरक्ता । सुष्ठु खल्विदमुच्यते – "रत्नं रत्नेन सङ्गच्छते" इति ।

विटः – (स्वगतम् ।) यदेव परिहर्तव्यं तदेवोदाहरति मूर्खः। कथं वसन्तसेना आर्यचारुदत्तमनुरक्ता । सुष्ठु खल्विदमुच्यते–"रत्नं रत्नेन सङ्गच्छते" इति । तद्गच्छतु किमनेन मूर्खेण। (प्रकाशम् ।) काणोली मातः? वामतस्तस्य सार्थवाहस्य गृहम्।[2]

न केवलमियं सद्गुणसम्पन्ना कलास्वपि निपुणा ।
इयं रङ्गप्रवेशेन कलानां चोपशिक्षया।
वञ्चना पण्डितत्वेन स्वरनैपुण्यमाश्रिता।।[3]

इयं दीनजनवत्सला गुणाभिमानिनी इति द्वितीयाङ्के उपवर्णिता। अस्याः सम्पत्तिः चतुर्थाङ्के चारुदत्त सन्देशमादाय तस्याः गृहमागच्छता विदूषकेन वर्णिता । चारुदत्तस्य संवाहकः दशसुवर्णानि द्यूते हारितः। सभिकः तं ताडयन्, धनार्थी अनुदधाव। सोऽपि भीतः वसन्तसेनां शरणं जगाम। साऽपि सभिकाय माधुराय देयं सुवर्णं दत्वा संवाहकं तस्मात् ररक्ष। स्वसम्पत्तिं दीनजनरक्षणे उपयोक्तुं सा सदैव इच्छति इति संवाहकं प्रति तस्याः एव वाक्येषु स्पष्टम्।

दुर्लभा गुणा विभवाश्च। अपेयेषु तडागेषु बहुतरमुदकं भवति।[4]

वेश्याः कुलपुत्रान् कुटुम्बिनः नाशयन्ति । वेश्याः तान् सदा पीडयित्वा भक्षयन्ति । नराणां यौवनानि धनानि हत्वा दग्धान् कुर्वन्ति इति तेषां स्वभावो कविना विशेषेण वर्णितः। स्त्रीषु श्रीषु च न विश्वासः कार्यः धनकारणेन हसन्ति रूदन्तीति तेषां दूषणमपि बहुधा कृतम् ।

इह सर्वस्वफलिनः कुलपुत्रामहाद्रुमाः।
निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः।।
त्रयश्च सुरतज्वालः कामाग्निः प्रणयेन्धनः।
नराणां यत्र हूयन्ते यौवनानि धनानि च ।।[5]

एवं विधायाः वेश्याप्रवृत्तेः इयं सर्वथा दूरोभूता। चारुदत्ते कृतविश्वासा एकदा शकारेण अनुधाविता बहुमूल्यं स्वाभरणजातं चारुदत्ते न्यासीकरोति । शर्विलको नाम चोरः स्वप्रियां दास्यात् मोचयितुं वसन्तसेनायाः सुवर्णभाण्डं चारुदत्तगृहात् अपहृतवान्। चारुदत्तपत्नी धूताम्बा स्वप्रियं अपवादात् मोचयितुं अनन्तमूल्यं मौक्तिकहारं चारुदत्ताय प्रेषितवती। चारुदत्तोऽपि विदूषक हस्तेन तन्मौक्तिकहारं वसन्तसेनान्तिकं प्रेषितवान् । वसन्तसेनां तं हारं गृहीतवती। यदि सा अलुब्धा किमर्थं स्वाभरणजातादपि शताधिक गुणो मूल्यं मौक्तिकहारं गृहीतवती इति शङ्का भवत्येव । तिरस्कृत हारे

2
3
4
5

ऋणग्रस्तो भविष्यामि इति चारुदत्तस्य व्यधा भवतीति वसन्तसेनायाः आशयोऽपि कविना पञ्चमाङ्कन्ते विवृतः।

अपि च वसन्तसेनायाः पात्रानन्तरं अधिकगुणयुक्तं स्त्री पात्रं चारुदत्तस्य धर्मपत्नी धूताम्बा। साऽपि भर्तारं वसन्तसेनानुरक्तं ज्ञात्वाऽपि न खिन्ना । किन्तु भर्तरि उपद्गते तं ऋणान्मोचयितुं पितृगृहादानीतम् अनन्तगुणान् मौक्तिकहारं तृणाय मेने । चारुदत्तः साक्षात् तं हारं न स्वीकरोतीति प्रथमं दानव्याजेन विदूषकहस्ते समर्पितवती । अनयैव रीत्या तस्याः पातिव्रत्येन समं उपायसालित्वमपि अभव्यज्यते।

एवं द्विसहसवर्षेभ्यः प्रागेव भारतीय स्त्री संस्कारपूर्णा गुणानुरागिणी आसीदिति शूद्रकः पात्रद्वयमुखेन स्त्रीस्वरूपं स्पष्टं निरूपितवान्।

**ग्रन्थसूची**

1. मृच्छकटितम् शूद्रकः प्रथमाङ्कः पृ.सं – 53.
2. मृच्छकटिकम् शूद्रकः प्रथमाङ्कः श्लो.सं 42.
3. मृच्छकटिकम् शूद्रकः द्वितीयाङ्कः – पृ. सं 121.
4. मृच्छकटिकम् शूद्रकः चतुर्थ अङ्कः – श्लो.सं – 10, 11.
5. मृच्छकटिकम् शूद्रकः प्रथम अङ्कः श्लो.सं –8.